श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीतः

# ॥ श्री अभीतिस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अभीतिस्तवः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अभीतिरिह यज्जुषां यदवधीरितानां भयं
    भयाभयविधायिनो जगति यन्निदेशे स्थिताः।
तदेतदतिलङ्घितद्रुहिणशम्भुशक्रादिकं
    रमासखमधीमहे किमपि रङ्गधुर्यं महः॥ 1 ॥

दयाशिशिरिताशया मनसि मे सदा जागृयुः
    श्रियाऽध्युषितवक्षसः श्रितमरुद्वृधासैकताः।
जगद्दुरितघस्मरा जलधिडिम्भडम्भस्पृशः
    सकृत्प्रणतरक्षणप्रथितसंविदः संविदः॥ 2 ॥

यदद्य मितबुद्धिना बहुळमोहभाजा मया
    गुणग्रथितकायवाङ्मनसवृत्तिवैचित्र्यतः।
अतर्कितहिताहितक्रमविशेषमारभ्यते
    तदप्युचितमर्चनं परिगृहाण रङ्गेश्वर॥ 3 ॥

मरुत्तरणिपावकत्रिदशनाथकालादयः
    स्वकृत्यमधिकुर्वते त्वदपराधतो बिभ्यतः।
महत् किमपि वज्रमुद्यतमिवेति यच्छ्रूयते
    तरत्यनघ तद्भयं य इह तावकः स्तावकः॥ 4 ॥

भवन्तमिह यः स्वधीनियतचेतनाचेतनं
    पनायति नमस्यति स्मरति वक्ति पर्येति वा।

गुणं कमपि वेत्ति वा तव गुणेश गोपायितुः
कदाचन कुतश्चन क्वचन तस्य न स्यात् भयम्॥ 5॥

स्थिते मनसि विग्रहे गुणिनि धातुसाम्ये सति
स्मरेदखिलदेहिनं य इह जातुचित् त्वामजम्।
तयैव खलु सन्धया तमथ दीर्घनिद्रावशं
स्वयं विहितसंस्मृतिर्नयसि धाम नैःश्रेयसम्॥ 6॥

रमादयित रङ्गभूरमण कृष्ण विष्णो हरे
त्रिविक्रम जनार्दन त्रियुग नाथ नारायण।
इतीव शुभदानि यः पठति नामधेयानि ते
न तस्य यमवश्यता नरकपातभीतिः कुतः॥ 7॥

कदाचिदपि रङ्गभूरसिक यत्र देशे वशी
त्वदेकनियताशयस्त्रिदशवन्दितो वर्तते।
तदक्षततपोवनं तव च राजधानी स्थिरा
सुखस्य सुखमास्पदं सुचरितस्य दुर्गं महत्॥ 8॥

त्रिवर्गपथवर्तिनां त्रिगुणलङ्घनोद्योगिनां
द्विषत्प्रमथनार्थिनामपि च रङ्गदृश्योदयाः।
स्खलत्समयकातरीहरणजागरूकाः प्रभो
करग्रहणदीक्षिताः क इव ते न दिव्या गुणाः॥ 9॥

बिभेति भवभृत् प्रभो त्वदुपदेशतीव्रौषधात्
कदध्वरसदुर्विषे बळिशभक्षवत् प्रीयते।
अपथ्यपरिहारधीविमुखमित्थमाकस्मिकी
तमप्यवसरे क्रमादवति वत्सला त्वद्दया॥ 10॥

अपार्थ इति निश्चितः प्रहरणादियोगस्तव
स्वयं वहसि निर्भयस्तदपि रङ्गपृथ्वीधर।
स्वरक्षणमिवाभवत् प्रणतरक्षणं तावकं
यदात्थ परमार्थविन्नियतमन्तरात्मेति ते॥ **11** ॥

लघिष्ठसुखसङ्गदैः स्वकृतकर्मनिर्वर्तितैः
कळत्रसुतसोदरानुचरबन्धुसम्बन्धिभिः।
धनप्रभृतिकैरपि प्रचुरभीतिभेदोत्तरैः
न बिभ्रति धृतिं प्रभो त्वदनुभूतिभोगार्थिनः॥ **12** ॥

न वक्तुमपि शक्यते नरकगर्भवासादिकं
वपुश्च बहुधातुकं निपुणचिन्तने तादृशम्।
त्रिविष्टपमुखं तथा तव पदस्य देदीपतः
किमत्र न भयास्पदं भवति रङ्गपृथ्वीपते॥ **13** ॥

भवन्ति मुखभेदतो भयनिदानमेव प्रभो
शुभाशुभविकल्पिता जगति देशकालादयः।
इति प्रचुरसाध्वसे मयि दयिष्यसे त्वं न चेत्
क इत्थमनुकम्पिता त्वदनुकम्पनीयश्च कः॥ **14** ॥

सकृत्प्रपदनस्पृशामभयदाननित्यव्रती
न च द्विरभिभाषसे त्वमिति विश्रुतः स्वोक्तितः।
यथोक्तकरणं विदुस्तव तु यातुधानादयः
कथं वितथमस्तु तत् कृपणसार्वभौमे मयि॥ **15** ॥

अनुक्षणसमुत्थिते दुरितवारिधौ दुस्तरे
यदि क्वचन निष्कृतिर्भवति साऽपि दोषाविला।
तदित्थमगतौ मयि प्रतिविधानमाधीयतां
स्वबुद्धिपरिकल्पितं किमपि रङ्गधुर्य त्वया॥ **16** ॥

विषादबहुळादहं विषयवर्गतो दुर्जयात्
बिभेमि वृजिनोत्तरस्त्वदनुभूतिविच्छेदतः।
मया नियतनाथवानयमिति त्वमर्थापयन्
दयाधन जगत्पते दयितरङ्ग संरक्ष माम्॥ **17** ॥

निसर्गनिरनिष्टता तव निरंहसः श्रूयते
ततस्त्रियुग सृष्टिवत् भवति संहृतिः क्रीडितम्।
तथाऽपि शरणागतप्रणयभङ्गभीतो भवान्
मदिष्टमिह यद्भवेत् किमपि मा स्म तज्जीहपत्॥ **18** ॥

कयाधुसुतवायसद्विरदपुङ्गवद्रौपदी -
विभीषणभुजङ्गमव्रजगणाम्बरीषादयः।
भवत्पदसमाश्रिता भयविमुक्तिमापुर्यथा
लभेमहि तथा वयं सपदि रङ्गनाथ त्वया॥ **19** ॥

भयं शमय रङ्गधाम्न्यनितराभिलाषस्पृशां
श्रियं बहुळय प्रभो श्रितविपक्षमुन्मूलय।
स्वयं समुदितं वपुस्तव निशामयन्तः सदा
वयं त्रिदशनिर्वृतिं भुवि मुकुन्द विन्देमहि॥ **20** ॥

श्रियः परिबृढे त्वयि श्रितजनस्य संरक्षके
सदद्भुतगुणोदधाविति समर्पितोऽयं भरः।
प्रतिक्षणमतः परं प्रथय रङ्गधामादिषु
प्रभुत्वमनुपाधिकं प्रथितहेतिभिर्हेतिभिः॥ **21** ॥

कलिप्रणिधिलक्षणैः कलितशाक्यलोकायतैः
तुरुष्कयवनादिभिर्जगति जृम्भमाणं भयम्।
प्रकृष्टनिजशक्तिभिः प्रसभमायुधैः पञ्चभिः
क्षितित्रिदशरक्षकैः क्षपय रङ्गनाथ क्षणात्॥ **22** ॥

दितिप्रभवदेहभिद्दहनसोमसूर्यात्मकं
तमःप्रमथनं प्रभो समुदितास्त्रबृन्दं स्वतः।
स्ववृत्तिवशवर्तितत्रिदशवृत्ति चक्रं पुनः
प्रवर्तयतु धाम्नि ते महति धर्मचक्रस्थितिम्॥ **23** ॥

मनुप्रभृतिमानिते महति रङ्गधामादिके
दनुप्रभवदारुणैर्दरमुदीर्यमाणं परैः।
प्रकृष्टगुणक श्रिया वसुधया च सन्धुक्षितः
प्रयुक्तकरुणोदधिः प्रशमय स्वशक्त्या स्वयम्॥ **24** ॥

भुजङ्गमविहङ्गमप्रवरसैन्यनाथाः प्रभो
तथैव कुमुदादयो नगरगोपुरद्वारपाः।
अचिन्त्यबलविक्रमास्त्वमिव रङ्गसंरक्षकाः
जितं त इति वादिनो जगदनुग्रहे जाग्रतु॥ **25** ॥

विधिस्त्रिपुरमर्दनस्त्रिदशपुङ्गवः पावकः
यमप्रभृतयोऽपि यद्विमतरक्षणे न क्षमाः।
रिरक्षिषति यत्र च प्रतिभयं न किञ्चित् क्वचित्
स नः प्रतिभटान् प्रभो शमय रङ्गधामादिषु॥ **26** ॥

स कैटभतमोरविर्मधुपरागझञ्झामरुत्
हिरण्यगिरिदारणस्त्रुटितकालनेमिद्रुमः।
किमत्र बहुना भजद्भवपयोधिमुष्टिन्धयः
त्रिविक्रम भवत्क्रमः क्षिपतु मङ्क्षु रङ्गद्विषः॥ **27** ॥

यतिप्रवरभारतीरसभरेण नीतं वयः
प्रफुल्लपलितं शिरः परमिह क्षमं प्रार्थये।
निरस्तरिपुसम्भवे क्वचन रङ्गमुख्ये विभो
परस्परहितैषिणां परिसरेषु मां वर्तय॥ **28** ॥

प्रबुद्धगुरुवीक्षणप्रथितवेङ्कटेशोद्भवाम्
इमामभयसिद्धये पठत रङ्गभर्तुः स्तुतिम्।
भयं त्यजत भद्रमित्यभिदधत् स वः केशवः
स्वयं घनघृणानिधिर्गुणगणेन गोपायति॥ 29॥

॥ इति श्री अभीतिस्तवः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥